दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लतृतीया
चैत्र 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-148 | 1 | मार्च 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलस्य सकल- गृह- उत्पादः (GDP) वर्धितः, प्रतिव्यक्ति- आयः २,८३,६२६ रूप्यकाणि, सेवाक्षेत्रं शीर्षस्थाने

3 नवदेहल्यां जल-जीवन-मिशन २.० (JJM 2.0) कृते भारतसर्वकार- हिमाचलसर्वकारयोः मध्ये सामञ्जस्य-पत्रे (MoU) हस्ताक्षरं सम्पन्नम्

4 विक्रमसंवत् २०८३ 'रौद्र' नवसंवत्सरस्य शास्त्रीय-वैज्ञानिक-महत्त्वम्

## सर्वाणि तैलशोधगाराणि पर्याप्ताशोधितसामग्र्या सह उच्चतमक्षमतया कार्यं कुर्वन्ति - पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः



**हिमसंस्कृतवार्ताः** - सर्वकारेण पुनः आश्वासितं यत् सर्वाणि शोधगाराणि पर्याप्ताशोधितसामग्र्या सह उच्चतमक्षमतया कार्यं कुर्वन्ति। देशीय-एल.पी.जी. उत्पादनं स्थिरम् अस्ति, पर्याप्त मात्राऽपि उपलभ्यते। नवदेहल्याम् आयोजितस्य पश्चिम एशियायाः वर्तमानस्थित्याम् अन्ता-मन्त्रालयीय-सत्रं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा सूचितवती यत् गतसप्ताहे उपभोक्तृभ्यः त्रिशताधिकैकादशसहस्र टन् परिमितं यावत् वाणिज्यिक एल. पी. जी. इत्यस्य आपूर्तिः कृता। सा अवोचत् यत् देशीय-एल. पी. जी. उत्पादनं चत्वारिंशत् प्रतिशतं यावत् वर्धिताऽस्ति। नौवहन-जलमार्ग-मन्त्रालयस्य विशेषसचिवः राजेशकुमारसिन्हा अवदत् यत् गत चतुर्विंशति होरासु कस्यापि समुद्रीय-घटनायाः सूचना न प्राप्ता, सर्वाः द्वाविंशति नौकाः, एकदशाधिक षड्शतं यावत् भारतीय-नाविकाः च सुरक्षिताः सन्ति। सः अवदत् यत् डी. जी. नौवहनः निरन्तरं तेषां निरीक्षणं कुर्वन् अस्ति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत्, प्रधानमन्त्रिणा नरेन्द्रमोदिना ओमान, मलेशिया, फ्रान्स, जोर्डन, कतर इत्येतेषां देशानां नेतृभिः सह वार्ता कृता, पश्चिम-एशिया-द्वन्द्वस्य विषये भारतस्य स्थितिम् उपस्थापितं तथा च संवादेन, शान्तेः उपरि बलं प्रदत्तम्। श्री जायसवालः अवदत् यत् प्रधानमन्त्री ऊर्जा-आधारित संरचनायाः उपरि आक्रमणस्य दृढतया निन्दाम् अकरोत्, सर्वे होर्मुज्-जलसंधिना सुरक्षित-नौपरिवहनस्य समर्थनं, समन्वयं च अनुवर्तितवन्तः।

## पीयूष गोयलः कैमरून-देशस्य याऊण्डे-नगरे आयोजिते विश्वव्यापार-सङ्घटनस्य चतुर्दशतमे मन्त्रीस्तरीय-सम्मेलने भारतीय-प्रतिनिधिसङ्घस्य नेतृत्वं विधास्यति

14th WTO Ministerial Conference
Yaoundé - Cameroon
2026

वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः अस्मिन् मासे षड्विंशतितः ऊनविंशति दिनाङ्कपर्यन्तं कैमरून-देशस्य याऊण्डे-नगरे आयोजिते विश्वव्यापार सङ्घटनस्य चतुर्दशतमे मन्त्रीस्तरीय सम्मेलने भारतीयप्रतिनिधिसङ्घस्य नेतृत्वं विधास्यति। वाणिज्यमन्त्रालयस्य आधिकारिक स्रोतानुसारं, भारतम् अस्मिन् सभायां विश्व-व्यापार-संघटनं इतोपि सुदृढीकरणाय अधिकं प्रयासं करिष्यति, येन विश्वव्यापारं प्रवर्धयितुं महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नोति। ट्रम्प्-प्रशासनेन आरोपितस्य शुल्कस्य विषयेऽपि डब्ल्यू. टी. ओ. सदस्यदेशाः चर्चितुं शक्नुवन्ति।

## उत्तराखण्ड-मन्त्रिमण्डलस्य विस्तारः

उत्तराखण्ड-राज्ये मुख्यमन्त्री पुष्कर-सिंह-धामिनः नेतृत्वे मन्त्रिमण्डलस्य विस्तारः अभवत्, यस्मिन् पञ्च विधायकाः सम्मिलिताः सन्ति। देहरादून-नगरे लोक-भवने आयोजिते शपथ ग्रहण-समारोहे राज्यपालः सेवानिवृत्तः लेफ्टिनेण्ट् जनरल गुरमीतसिंहः नवनियुक्तेभ्यः सदस्येभ्यः पदस्य गोपनीयतायाः च शपथग्रहणं कारितवान्।

## कृषकाः स्वोत्पादनानां उचितमूल्यं प्राप्स्यन्ति - शिवराजसिंह चौहानः



**हिमसंस्कृतवार्ताः** - केन्द्रीयकृषि-कृषक-कल्याण मन्त्री शिवराजसिंह चौहानः नवदेहली नगरे वरिष्ठैः अधिकारिभिः सह सम्पूर्ण देशे कृष्याः स्थितिं समीक्षितवान्। कतिपयेषु राज्येषु अकालवृष्ट्या, शिलावृष्ट्या च क्षतिग्रस्तेषु सस्येषु चर्चायाः अनन्तरम् एषा सभा अभवत्। सामाजिक-पटले श्रीचौहानः अवदत् यत् कृषकाः यथाशीघ्रं उपशमनं प्राप्स्यन्ति इति सुनिश्चेतुं तत्क्षणस्य सर्वेक्षणस्य आवश्यककार्याणां च कृते निर्देशाः प्रदत्ताः सन्ति। सः अवदत् यत् न्यूनतमसमर्थनमूल्ये सुगमतया क्रयणं सुनिश्चेतुं आवश्यकानि निर्देशानि अपि प्रदत्तानि, येन कृषकाः स्वोत्पादनानां उचितमूल्यं प्राप्तुं शक्नुवन्ति।

## भारत-पाकिस्तान-जल-सन्धिः स्थगिता भविष्यति- पी. हरीशः

**हिमसंस्कृतवार्ताः** - भारतेन पुनः उक्तं यत् यावत् इस्लामाबादः आतङ्कवादस्य समर्थनं समाप्तं न करोति तावत् पर्यन्तं पाकिस्तानेन सह सिन्धु-जल-सन्धिः स्थगिता एव भविष्यति। संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः पी. हरीशः अवदत् यत् पाकिस्तानेन सन्धिसम्बन्धि-चिन्तां प्रकटनात् पूर्वं मानवजीवनस्य पवित्रतां अवश्यं पालनीयं, सहैव सः उक्तवान् यत् पाकिस्तानः आतङ्कवादस्य वैश्विककेन्द्रम् अस्ति। सः अवदत् यत् भारतं षष्ठ्यधिक-ऊनविंशतिशत तमे वर्षे सद्भावनया सन्धिं कृतवान् परन्तु पाकिस्तानदेशः युद्धैः भयोत्पादक-आक्रमणैः च सन्धिं दुर्बलः कृतवान्। गतवर्षस्य पहलगाम आतङ्क्याक्रमणस्य अनन्तरं भारतेन सन्धिः स्थगिता। विश्वजलदिवसस्य उपलक्ष्ये आयोजिते यू.एन. कार्यक्रमे भाषणं कुर्वन्, श्रीहरिशः अवदत् यत्, जलजीवन-मिशन् इत्यस्य अन्तर्गतं प्रगतिं प्रकाशयन्, सुरक्षितजलस्य विस्ताराय भारतं प्रतिबद्धः अस्ति।

## भारतस्य ऊर्जा-संक्रमणं व्यावहारिक-नीति-निर्माणेन, स्वावलम्बनेन, स्पष्ट-प्रेरणया च प्रेरितम् अस्ति- प्रधानमन्त्री।

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतस्य ऊर्जा-संक्रमणं व्यावहारिक-नीति-निर्माणेन, स्वावलम्बनेन, स्पष्ट-प्रेरणया च प्रेरितम् अस्ति। नवीन- नवीकरणीय ऊर्जा-राज्यमन्त्री श्रीपद-नाईकस्य लेखम् विनिमयी कुर्वन् प्रधानमन्त्री उक्तवान् यत् अयं लेखः देशस्य ऊर्जा-क्षेत्रस्य परिवर्तनशील-यात्रां निरूपयति। सः अकथयत् यत् विद्युती-करणस्य, स्वच्छ ऊर्जायाः, विनिर्माणस्य च विषये विशेषेण बलेन भारतं वैश्विक ऊर्जा-परिदृश्ये निर्णायकाध्यायं निर्माति।

## नवरात्रिविशेषः
## तृतीयं चन्द्रघण्टा



**या देवी सर्वभूतेषु**
**माँ चन्द्रघण्टा रूपेण संस्थिता।**
**नमस्तस्यै नमस्तस्यै**
**नमस्तस्यै नमो नमः॥**
**पिण्डज प्रवरारूढा**
**चण्डकोपास्त्रकैर्युता।**
**प्रसादं तनुते मह्यं**
**चन्द्रघण्टेति विश्रुता॥**

श्रेष्ठ सिंह पर सवार और चण्ड (भयानक) क्रोध के साथ अस्त्र-शस्त्र धारण करने वाली, विश्वविख्यात माँ चन्द्रघण्टा मुझ पर अपनी कृपा करें।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# हिमाचलस्य सकल- गृह- उत्पादः (GDP) वर्धितः, प्रतिव्यक्ति- आयः २,८३,६२६ रूप्यकाणि, सेवाक्षेत्रं शीर्षस्थाने




**हिमसंस्कृतवार्ताः- शिमला।** केन्द्रसर्वकारतः 'राजस्व- हानि- अनुदानस्य' (RDG) विषये जातं सङ्कटं विहाय अपि हिमाचलप्रदेशस्य अर्थव्यवस्था सुदृढा अभवत्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खूमहोदेन विधानसभायां प्रस्तुतस्य 'आर्थिक-सर्वेक्षणस्य' विवरणानुसारं प्रतिव्यक्ति-आयः अपि वर्धितः। प्रथमवारं राज्ये पर्यटकाणां सङ्ख्या त्रिकोटि (3 Crore) परिमितां सीमामतिक्रान्ता।

## अर्थव्यवस्थायाः मुख्यबिन्दवः

१. कुल-उत्पादनम्- वर्षे २०२५-२६ मध्ये राज्यस्य कुल-आर्थिक-उत्पादनक्षमता २.५४ लक्षकोटि-रूप्यकाणि भवितुम् अनुमानितम् अस्ति, यत् गतवर्षापेक्षया १०.१ प्रतिशतम् अधिकम् अस्ति।
२. प्रतिव्यक्ति-आयः- इयं वर्धित्वा २,८३,६२६ रूप्यकाणि जाता, या राष्ट्रिय-औसत-अपेक्षया ६४,०५१ रूप्यकाणि अधिका अस्ति। (२०११-१२ तमे वर्षे इयं केवलं ८७,७२१ रूप्यकाणि आसीत्)।
३. सेवाक्षेत्रम् (Service Sector)- अस्य योगदानं सर्वाधिकं ४६.३ प्रतिशतं (६२,५८१ कोटिः) अस्ति। पर्यटन-व्यापार-परिवहन-क्षेत्राणां विस्तारेण एतत् क्षेत्रं सुदृढं जातम्।
४. उद्योगक्षेत्रम्- अस्य योगदानं ३९.४ प्रतिशतं अस्ति। निर्माणक्षेत्रे (Construction) सर्वाधिकं १२.५६ प्रतिशतं वृद्धिः सम्भाविता।
५. कृषिक्षेत्रम्- अस्य अंशः १४.३ प्रतिशतं (३२,४१५ कोटिः) वर्तते।

**पर्यटनं ऊर्जा च-**
राज्ये २०२० तमे वर्षे केवलं ३२.१३ लक्षं पर्यटकाः आगताः आसन्, ये २०२५ तमे वर्षे वर्धित्वा ३११.४७ लक्षं (३.११ कोटिः) जाताः। ऊर्जाक्षेत्रे अपि राज्येन दिसम्बर-२०२५ पर्यन्तं १,६६८ कोटि- रूप्यकाणां राजस्वं सम्पादितम्।

## शनिवासरे चतुर्थं आयव्ययकम् उपस्थापयिष्यति मुख्यमंत्री सुक्खुः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शनिवासरे (विश्रामदिने) प्रातः ११:०० वादने विधानसभायां स्वस्य चतुर्थं बजटं प्रस्तौष्यति। 'आरडीजी' (RDG) अनुदानस्य समाप्तेः अनन्तरं अस्य बजटस्य आकारः कीदृशः भविष्यति, इति विषये सर्वेषां दृष्टिः अस्ति।

## बजटस्य मुख्याः प्रश्नाः-

१. किं बजटस्य आकारः गतवर्षापेक्षया विशालः भविष्यति?
२. विद्युत्-खाद्य-परिवहन-क्षेत्रेषु दीयमाना 'अनुदानम्' (Subsidium) निरन्तरा भविष्यति वा?
३. किं कर्मचारिणां सेवानिवृत्ति-आयु-सीमायां (Retirement Age) कश्चन निर्णयः भविष्यति?

# सीमा-महाविद्यालये बी. एड. (B.Ed.) कक्षाणां प्रारम्भः विचाराधीनः- रोहितः



रोहड़ू-क्षेत्रस्य कांग्रेस-विधायकः मोहन लाल ब्राक्टा प्रश्नकाले पृष्टवान् यत् शिक्षामन्त्री वदतु यत् रोहड़ू-निर्वाचनक्षेत्रस्य 'राजा वीरभद्र सिंह स्नातकोत्तर महाविद्यालय-सीमा' इत्यत्र कदा आरभ्य बी.एड. कक्षाः प्रचलिष्यन्ति। उत्तरं यच्छन् शिक्षामन्त्री रोहित ठाकुरः अवदत् यत् अस्मिन् महाविद्यालये बी. एड. कक्षाणां प्रारम्भस्य विषयः वर्तमानकाले सर्वकारस्य विचाराधीनः अस्ति। नियमानुसारं निर्णयः भविष्यति। सः उक्तवान् यत् एषः विषयः मन्त्रिमण्डलेन स्वीकृतः अस्ति, सर्वकारः शीघ्रमेव आरम्भं करिष्यति।
इतः परं, कृषकैः सह जायमानस्य कथितछलप्रकरणस्य विषये कांग्रेस-विधायिका अनुराधा राणा अवदत् यत् विगतवर्षेषु कृषकैः सह छलस्य बहूनि प्रकरणानि सम्मुखं आगतानि सन्ति। येषु प्रकरणेषु प्राथमिकी पञ्जीकृता भवति, केवलं तेष्वेव कार्यवाही भवति, अन्येषु अपेक्षितपदक्षेपाः न स्वीक्रियन्ते। अस्मिन् मुख्यमन्त्री अवदत् यत् छलप्रकरणेषु सर्वकारः गाम्भीर्येण कार्यवाहीम् करिष्यति।

# हिमाचले अटल-कन्दरायाः समीपे हिमस्खलनम्, पर्वतेषु पादद्वयपरिमितः हिमपातः, पर्यटकेभ्यः 'परामर्शाः' निर्गताः



**हिमसंस्कृतवार्ताः- मनाली।** अटल-कन्दरायाः 'दक्षिणपटले' (South Portal) हिमस्खलनेन एका महती दुर्घटना कथञ्चित् परिहृता। महत्-हिमपातस्य कारणेन मनाली-केलाङ्ग-मार्गे स्थाने स्थाने हिमस्खलनस्य (Avalanche) आशङ्का वर्धिता अस्ति। मनालीसहितं लाहौल-घाटी-क्षेत्रस्य उच्चभागेषु गतशनिवासरात् निरन्तरं हिमपातः प्रचलति। अटल-कन्दरायाः उभयोः प्रान्तयोः पर्वतेषु पादद्वयपरिमितः अधिकः च हिमपातः जातः। अनेन हिमस्खलनस्य भयं वर्धितम्। सूचनानुसारं सायङ्काले पञ्चवादने 'दक्षिणपटले' हिमस्खलनं अभवत्। यस्मिन् समये एषा घटना घटिता, तस्मिन् समये द्वे वाहने ततः गच्छतः स्म। द्वे अपि वाहने हिमे निरुद्धे (stuck), किन्तु चालकाः स्वचातुर्येण वाहने सुरक्षितं बहिः निष्कासितवन्तः। मनाली-नगरस्य डीएसपी (DSP) के.डी. शर्मा महोदयः अवदत् यत् अटल-कन्दरायाः समीपे हिमस्खलनं जातम् अस्ति। सः सूचितवान् यत् महती दुर्घटना निवारिता। सः वाहनचालकान् आग्रहं कृतवान् यत् यावत् स्थितिः सामान्या न भवति, तावत् यात्रां न कुर्वन्तु।

## वर्षाकाले/ हिमपातकाले पर्यटकाः कथं यात्रां कुर्वन्तु (परामर्शसूची)-

> सुरक्षा-उपकरणानि- उत्तमगुणवत्तायुक्तं वर्षकम् (Raincoat), छत्रं, जलरोधकं (Waterproof) स्यूतं च सहैव स्थापयन्तु।
> पादत्राणानि- दृढसंग्रह-युक्तानि (Grip) जलरोधकानि 'ट्रैकिङ्ग-शूज' इति पादत्राणानि एव धरन्तु।
> यन्त्राणां रक्षणम्- वैद्युतिक-यन्त्राणां (कैमरा, दूरभाषः) स्यूतेषु 'सिलिका-जेल' पुटकानि स्थापयन्तु, येन आर्द्रता (Moisture) न भवेत्।
> रात्रि-भ्रमणं वर्जयन्तु- पर्वतेषु कुहेलिकायाः (Fog) वर्षस्य च कारणेन दृश्यता (Visibility) न्यूना भवति, अतः रात्रौ वाहनचालनं न कुर्वन्तु।
> स्थानीय-चालकः- यदि सम्भवं स्यात्, तर्हि स्वयं चालनस्य स्थाने स्थानीय-चालकस्य साहाय्यं गृह्णन्तु।
> सञ्चार-सङ्कटम्- वर्षाकाले जालकार्यं (Network) प्रायः नश्यति, अतः 'गूगल-मैप्स' इति मानचित्रं 'ऑफलाइन' रूपेण पूर्वमेव अवतरणं (Download) कुर्वन्तु।
> स्वास्थ्यम्- वर्षाकाले सङ्क्रमणं शीघ्रं प्रसरति, अतः नूतनं निर्मितम् उष्णं भोजनं तथा क्वथितं (Boiled) जलं वा पिबन्तु।

# निजीभूमौ वंशकर्तने न भविष्यति शुल्कम्, 'वृक्ष' श्रेण्याः अपि बहिः

**हिमसंस्कृतवार्ताः- शिमला।**
जसवां-परागपुर-क्षेत्रस्य विधायकः बिक्रमसिंहः प्रश्नकाले इमं विषयम् उत्थापितवान् यत् निजीभूमौ वंशकर्तने कृषकेभ्यः शुल्कं न संग्रहीतव्यम्। अस्मिन् विषये मुख्यमन्त्रिणा उत्तरं दत्तं यत् अरण्येतरभूमौ उत्पादितः वंशः इदानीं 'वृक्ष' श्रेण्याः बहिः कृतः अस्ति।
मुख्यमन्त्रिणा अस्मिन् विषये उचितपदक्षेपस्य आश्वासनं दत्तम्। यद्यपि, वनक्षेत्रेषु प्राप्यमाणः वंशः अद्यापि 'वन-उत्पाद' श्रेण्यां वर्तते। एवं सति परिवहनसमये निजीभूमेः वनभूमेः च वंशयोः भेदं कर्तुं व्यावहारिकदृष्ट्या कठिनं भवति, अतः परीक्षणं नियन्त्रणं च आवश्यकम् अस्ति। विधायकः आग्रहं कृतवान् यत् निजीभूमौ वर्धितस्य वंशस्य उपरि किमपि शुल्कं न स्वीकरणीयम्



# नवदेहल्यां जल-जीवन-मिशन २.० (JJM 2.0) कृते भारतसर्वकार-हिमाचलसर्वकारयोः मध्ये सामञ्जस्य-पत्रे (MoU) हस्ताक्षरं सम्पन्नम्



**हिमसंस्कृतवार्ताः - नवदेहली/शिमला।** नवदेहल्यां भारतसर्वकारस्य तथा हिमाचलप्रदेशसर्वकारस्य च मध्ये 'जल-जीवन-मिशन २.०' (JJM 2.0) इति परियोजनायै एकं महत्त्वपूर्णां सन्धिं (MoU) स्वीकृत्य हस्ताक्षरं कृतम्। इयं परियोजना राज्यस्य ग्रामीणक्षेत्रेषु शुद्धपेयजलस्य आपूर्तिं सुदृढां कर्तुं अत्यन्तं सहायिका भविष्यति।

*परियोजनायाः मुख्यपक्षाः*

१. अवधिः - 'जल-जीवन-मिशन २.०' इत्यस्य कार्यान्वयनम् दिसम्बर-२०२८ पर्यन्तं भविष्यति।

२. पुनर्निर्माणम् अधोसंरचना चः- अस्याः अन्तर्गतं पुरातन-पेयजल-योजनानां पुनर्गठनं तथा अधोसंरचनायाः (Infrastructure) पुनर्निर्माणं भविष्यति।

३. संरचनात्मक-परिष्काराः:- ग्रामीण-पेयजल-आपूर्ति-क्षेत्रेषु संरचनात्मक-परिष्कारेषु (Structural Reforms) विशेषं ध्यानं प्रदास्यते।

**भौगोलिक-आह्वानानि आर्थिक-याचना च** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् हिमाचलप्रदेशस्य भौगोलिक-स्थितयः अत्यन्तं कठिनाः सन्ति, अतः अत्र अन्यान् राज्यान् इव मापदण्डान् (Parameters) प्रयोक्तुं अनुचितं वर्तते। सः केन्द्रसर्वकारं १,२२७ कोटि-रूप्यकाणां लम्बितां राशिं (Pending Funds) शीघ्रं मोक्तुं (Release) अपि आग्रहं कृतवान्, येन कार्याणि सुचारुरूपेण प्रचलन्तु। अस्मिन् अवसरे केन्द्रीय-जलशक्ति-मन्त्री सी.आर. पाटिलः आभासीय-माध्यमेन संयोजितः आसीत्। मुख्यमन्त्रिणा सह उप-मुख्यमन्त्री मुकेश-अग्निहोत्री अपि उपस्थितः आसीत्।मुख्यमंत्री सुखविंदरसिंहसुक्खुः अवदत् यत् "वयं हिमाचलस्य प्रत्येकं ग्रामीण-परिवाराय शुद्धं पर्याप्तं च जलं दातुं प्रतिबद्धाः स्मः।"

# 'मल्टी टास्क वर्कर्स' (Multi Task Workers) इत्येतासां कृते भविष्यति समाना योजना- विक्रमादित्यः



ऊनाक्षेत्रस्य भाजपाविधायकः सतपाल सिंह सत्ती प्रश्नकाले पृष्टवान् यत् लोकनिर्माणविभागे नियुक्तानां 'मल्टी टास्क वर्कर्स' इत्येतेषां वेतनं प्रतिमासं ५५०० रूप्यकाणि कार्यसमयः च ४ घण्टाः सन्ति। सः अपृच्छत् यत् किमर्थं एतेभ्यः ८ तः १० होरा कार्यं गृह्यते? किं सर्वकारः कार्यसमयं दृष्ट्वा तेषां वेतने वृद्धिं कर्तुं विचारयति?
उत्तरं यच्छन् लोकनिर्माणमन्त्री विक्रमादित्य सिंहः अवदत् यत् पीडब्ल्यूडी विभागे नियुक्तानां नियुक्तिसमये मानदेयम् ४५०० रूप्यकाणि आसीत्, यत् २०२४ वर्षे ५००० तथा २०२५ वर्षे ५५०० रूप्यकाणि प्रतिमासं कृतम्। कार्यसमयस्य विषये सः उक्तवान् यत् 'मल्टी टास्क वर्कर्स योजना २०२२' इत्यस्य प्रस्तावानुसारं कश्चन निश्चितः कार्यसमयः निर्धारितः नास्ति। तथापि, एतेषां कृते एकां सुव्यवस्थितां योजनां निर्मातुं प्रस्तावः विचाराधीनः अस्ति।

# 'ऋतम् २०२६' कार्यक्रमे SP Sanskrit Studio इत्यस्य आधिकारिक-वस्त्रसामग्र्याः विमोचनम्



**हिमसंस्कृतवार्ता मुम्बई।** मुंबईनगरे स्थिते Indian Institute of Technology Bombay इत्यस्याः संस्थायाः Centre for Sanskrit Learning (CSL) द्वारा ८ मार्च २०२६ दिनाङ्के आयोजिते वार्षिके संस्कृतमहोत्सवे "ऋतम् २०२६" अवसरे SP Sanskrit Studio इत्यस्य आधिकारिक-वस्त्रसामग्र्या (Merchandise) भव्यं विमोचनम् अभवत्।
SP Sanskrit Studio इयं संस्था संस्कृतदंपत्योः श्रीमांन् प्रणव गोगटे तथा श्रीमती सुमेधा गोगटे इत्येताभ्यां प्रारब्धा अस्ति। एषा संस्था संस्कृतभाषायाः प्रचार-प्रसारार्थं आधुनिक-रूपेण विविधान् सृजनात्मकान् उपक्रमान् आरभते। अस्मिन् विशेष-अवसरे SP Sanskrit Studio इत्यस्य नवीन-टी-शर्ट्-संग्रहः प्रथमवारं सार्वजनिकरूपेण प्रस्तुतः। एतेषां वस्त्राणां निर्माणस्य मुख्योद्देश्यः संस्कृतभाषायाः तथा भारतीयसंस्कृतेः संदेशं आधुनिक-युवापीढ्यां प्रति सुलभतया प्रसारितुम् इति अस्ति। विमोचनकार्यक्रमः माननीय-अतिथीनां सन्निधौ सम्पन्नः। अस्मिन् अवसरे प्रसिद्धा लेखिका सु.श्री. आमी गणात्रा महोदया, श्रीमान् नारायणदत्तमिश्रमहोदयः, प्रो.गणेश रामकृष्णन्, विद्वान् श्रीहरिगोकर्णकरः महोदयः, Vertiv उद्योगसमूहस्य डॉ.ए.एस्. प्रसादमहोदयः अन्ये विशिष्ट-अतिथयः उपस्थिताः आसन्। तैः सर्वैः एतस्य अभिनव-प्रयत्नस्य प्रशंसा कृता तथा संस्कृतभाषायाः प्रसाराय एतादृशाः नूतनाः उपक्रमाः अत्यन्तम् आवश्यकाः इति अभिप्रायः व्यक्तः। कार्यक्रमे उपस्थितैः संस्कृतप्रेमिभिः तथा विद्यार्थिभिः एतस्य वस्त्रसंग्रहस्य प्रति विशेषः उत्साहः व्यक्तः। आधुनिक-रूपेण संस्कृतस्य प्रचारं कर्तुं SP Sanskrit Studio इत्यस्य अयं उपक्रमः संस्कृतप्रेमिणां मध्ये नूतनां प्रेरणां जनयति इति अभिप्रायः व्यक्तः।एषः कार्यक्रमः "सहस्रमुखेषु संस्कृतम्" इत्यस्य अन्दोलनस्य एकः अन्यतमः उपक्रमः आसीत्। "सहस्रमुखेषु संस्कृतम्" इति उपक्रमः संस्कृतभाषायाः संरक्षण-प्रसारयोः समर्पितः अस्ति। अस्य आरम्भः २०२२ तमे वर्षे अभवत्। अस्य प्रमुखः उद्देशः संस्कृतभाषां केवलं पुस्तकेभ्यः बहिः आनीय लोकजीवने प्रवर्तयितुम् अस्ति।अस्य उपक्रमस्य माध्यमेन विविधाः पाठ्यक्रमाः, सांस्कृतिककार्यक्रमाः, तथा सहभागितापराः आयोजनाः नियमितरूपेण आयोजिताः भवन्ति। अनेन छात्राः, स्वयंसेवकाः, संस्कृतप्रेमिणः च एकत्र आगत्य भाषायाः अभ्यासं कुर्वन्ति। "सहस्रमुखेषु संस्कृतम्" कारणात् १५००तः अधिकाः जनाः अस्मिन् आंदोलने युक्ताः वर्तन्ते। अद्य "सहस्रमुखेषु संस्कृतम्" इति एकः सशक्तः आन्दोलनरूपेण विकसितः अस्ति, यत्र प्रत्येकः सहभागी स्वस्वरूपेण संस्कृतभाषायाः पुनरुत्थाने योगदानं ददाति।

# ऋतुविभागेन उप-हिमालयी-पश्चिमबङ्गप्रदेशे, सिक्किम-प्रदेशे च प्रचण्डवृष्टेः संभावना ऋतुविभागेन प्रकटिता

भारत-ऋतु-विभागेन अद्य पर्यन्तम् उप-हिमालयीय-पश्चिमवङ्गे सिक्किमे च विभिन्नेषु स्थानेषु प्रचण्ड-वृष्टेः पूर्वानुमानं प्रकटितम् । ऋतु-विभागेन हिमाचलप्रदेशे उत्तराखण्डे च विभिन्नेषु स्थानेषु प्रचण्डवृष्टेः संभावना प्रकटिता अस्ति। विभागेन सूचितम् यत् दिल्ली-हरियाणा-चण्डीगढ-बिहार-झारखण्ड-मध्यप्रदेश-ओडिशा-पञ्जाब-उत्तरप्रदेशेषु पृथक-पृथक स्थानेषु ओला-वृष्ट्या मेघगर्जनेन च सह वृष्टेः सम्भावनाऽस्ति । ऋतु-विभागेन इतोऽपि संसूचितम् यत् अस्य मासस्य चतुर्विंशति दिनाङ्कपर्यन्तं मत्स्यपालकाः उत्तर-ओडिशा-पश्चिमवङ्ग-तटयोः समीपे समुद्रे न गच्छेयुः।

# सशक्तस्य आत्मनिर्भरस्य च भारतस्य परिकल्पना तदा एवं साकारं भवितुम् अर्हति यदा देशस्य नागरिकाः स्वस्थाः भवन्ति - राष्ट्रपतिः मुर्मू



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदीमुर्मुः अकथयत् यत् सशक्तस्य आत्मनिर्भरस्य च भारतस्य परिकल्पना तदा एवं साकारं भवितुम् अर्हति यदा देशस्य नागरिकाः स्वस्थाः भवन्ति। उत्तरप्रदेशस्य वृन्दावने रामकृष्ण मिशन्-सेवाश्रम-चिकित्सालये नन्द-किशोर-सोमानी-ओन्कोलोजी-खण्डस्य उद्घाटनानन्तरं जनसमूहं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, अद्य सर्वकारः स्वास्थ्यसेवायाः मूलसौकर्यं सुदृढं कर्तुं, प्रत्येकस्य नागरिकस्य कृते गुणवत्तायुतां चिकित्सा सेवां सुनिश्चेतुं च निरन्तरं प्रयतमानः अस्ति। राष्ट्रपतिः मुर्मुः अवदत् यत्, आयुष्मान-भारत इत्यादीनां प्रमुख उपक्रमाणां माध्यमेन कोटिशः नागरिकेभ्यः सुलभमूल्येन गुणवत्तायुक्तं च स्वास्थ्यसेवाः प्रदत्ताः सन्ति।

# विक्रमसंवत् २०८३ 'रौद्र' नवसंवत्सरस्य शास्त्रीय-वैज्ञानिक-महत्त्वम्

भारतीय- कालगणना- पद्धतिः विश्वस्य प्राचीनतमा वैज्ञानिकप्रणालीषु एकत्वेन स्वीक्रियते। अस्याः परम्परायाः अन्तर्गतं विक्रमसंवत् २०८३ इत्यस्य शुभारम्भः चैत्र- शुक्ल- प्रतिपदायां भवति। एषा तिथिः भारतीय- नववर्षरूपेण प्रतिष्ठिता अस्ति, या सृष्टेः आरम्भस्य, नवचेतनायाः, प्राकृतिक-सन्तुलनस्य च प्रतीकत्वेन स्वीकृता। एषः केवलं धार्मिक-उत्सवः न, अपि तु वेद-ज्योतिष-विज्ञानानां समन्वयस्य अद्भुतम् उदाहरणम् अस्ति।

## १. वैदिक-शास्त्रीय-आधारः

भारतीय-ग्रन्थेषु स्पष्टतया निर्दिष्टम् अस्ति यत् सृष्टेः रचना चैत्र-शुक्ल-प्रतिपदायां अभवत्-"चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि।" (ब्रह्मपुराणम्) अर्थात् ब्रह्मा चैत्रमासस्य शुक्ल- प्रतिपदायां सृष्टेः निर्माणं कृतवान्। अतः एषः दिवसः नवसृजनस्य प्रतीकत्वेन मन्यते।
वेदेषु अपि सृष्टेः प्रारम्भः तथा कालचक्रस्य विवेचनं दृश्यते- "ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत।" (ऋग्वेदः)अयं मन्त्रः दर्शयति यत् सृष्टेः उद्गमः सत्येन ऋतेन च अभवत्, यत् प्राकृतिक-सन्तुलनं सूचयति।

## २. ज्योतिषीय-आधारः-

ज्योतिषशास्त्रानुसारं चैत्र- शुक्ल- प्रतिपदायाः कालः अत्यन्तं महत्त्वपूर्णः अस्ति। अस्मिन् काले सूर्यः मीनराशौ स्थितः सन् मेषसंक्रान्तेः समीपे भवति, चन्द्रमा च शुक्लपक्षे वर्धमानः भवति।
"शुक्लपक्षे चन्द्रमा वर्धते शुभदायकः।" अर्थात् शुक्लपक्षे चन्द्रस्य कला वर्धते, या वृद्धेः, विकासस्य, समृद्धेः च प्रतीका अस्ति। सूर्यः आत्मकारकः, चन्द्रः मनसः कारकः। यदा उभौ सम्यक् सन्तुलितौ भवतः, तदा मानवजीवने शारीरिक- मानसिक- आध्यात्मिक- सन्तुलनं स्थाप्यते। अस्य अतिरिक्तं नवसंवत्सरारम्भे ग्रहाणां स्थितेः आधारेण सम्पूर्णवर्षस्य फलनिर्णयः क्रियते, यः "संवत्सरफलम्" इति कथ्यते। एषा ज्योतिषीयगणना कृषौ, वर्षायां, वाणिज्ये, सामाजिक-स्थितिषु च अत्यन्तं उपयोगिनी भवति।

## ३. वैज्ञानिक-दृष्टिकोणः-

भारतीयनववर्षस्य समयः पूर्णतया वैज्ञानिक- आधारेण निर्धारितः अस्ति। चैत्र- शुक्ल- प्रतिपदायाः समीपे वसन्तऋतुः स्वस्य चरमसीमां प्राप्नोति, या जीवने नवचेतनां जनयति।
अस्मिन् काले वृक्षेषु नूतनपत्राणि जायन्ते, पुष्पाणि विकसन्ति, एषः प्राकृतिक-पुनर्जन्मकालः अस्ति।
सूर्यस्य किरणाः सम्यक् सन्तुलिताः भवन्ति, येन जलवायुः अनुकूलः भवति। दिवस-रात्र्योः समता (विषुवकालस्य समीपे) दृश्यते, यत् ऊर्जासन्तुलनस्य सूचकः अस्ति। मानवशरीरे रोगप्रतिरोधक-शक्तिः वर्धते, अतः नूतनकार्यस्य आरम्भः अनुकूलः भवति।
आधुनिक-विज्ञानम् अपि एतत् स्वीकरोति यत् ऋतु-परिवर्तनस्य प्रभावः मानव-शरीरे मनसि च भवति। अतः अयं कालः नूतन-संकल्पानां योजनानां च कृते श्रेष्ठः मन्यते।

## ४. सांस्कृतिक-आध्यात्मिक-महत्त्वम्-

चैत्र-शुक्ल-प्रतिपदा भारतीय-संस्कृतौ महान् उत्साहेन श्रद्धया च उत्सवत्वेन आचर्यते। अस्य विभिन्नेषु प्रदेशेषु भिन्नानि नामानि सन्ति- यथा गुडीपाडवा, उगादि इत्यादयः।
अस्मिन् दिने जनाः-
गृह-शुद्धिं सज्जां च कुर्वन्ति, पञ्चाङ्ग-श्रवणं कुर्वन्ति, नूतनकार्याणां शुभारम्भं कुर्वन्ति, व्रत-पूजन-दानादीनि आचरन्ति।
"सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।"
एषः शान्तिमन्त्रः अस्य दिवसस्य आध्यात्मिकं लक्ष्यं प्रकटयति।

## ५. शिक्षात्मक-दृष्टिकोणः-

प्रत्येक-भारतीयेन आवश्यकं यत् सः भारतीय- नववर्षं केवलं परम्परारूपेण न पश्येत्, अपि तु तस्य पृष्ठे निहितान् वैज्ञानिक-दार्शनिक-तत्त्वान् अवगच्छेत्।
अस्मिन् नववर्षे निम्नलिखित- विषयाणां समन्वयः दृश्यते-
खगोलविज्ञानम्- सूर्य-चन्द्रयोः गतिः।
ज्योतिषविज्ञानम्- ग्रहप्रभावः, संवत्सरफलम्।
पर्यावरणविज्ञानम्- ऋतु-परिवर्तनम्।
जीवविज्ञानम्- मानवशरीरे प्रभावः। एवं एषा समग्र-ज्ञान-प्रणाली अस्ति।

### संवत् २०८३ इत्यस्य सन्देशः-

विक्रमसंवत् २०८३ अस्मान् शिक्षयति यत् प्रतिवर्षं नूतन-आरम्भस्य अवसरः भवति। वयं स्वदोषान् त्यक्त्वा नूतनसंकल्पैः अग्रे गन्तव्यम्।
"उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।"
अतः नववर्षस्य वास्तविकः अर्थः अस्ति- नवसंकल्पः, नव ऊर्जा, नवदिशा।

**उपसंहारः-** विक्रमसंवत् २०८३ चैत्र-शुक्ल-प्रतिपदायाः आरम्भः एतत् सिद्धयति यत् भारतीय-कालगणना केवलं धार्मिक-मान्यता न, अपि तु गम्भीर- वैज्ञानिक-ज्योतिषीय-दार्शनिक-आधारेण निर्मिता अस्ति। एषा अस्मान् प्रकृतेः सह सामञ्जस्यं स्थापयितुं, जीवनस्य सन्तुलनं धारयितुं, निरन्तरं प्रगन्तुं च प्रेरयति।
अस्माकं विश्वविद्यालये महर्षि महेशयोगी वैदिक विश्वविद्यालये, करौंदी- कटनी (मध्यप्रदेशे) अयं नवसंवत्सरः उत्सवरूपेण आचर्यते। अद्य १९ मार्च २०२६ तः नवदिनपर्यन्तं नवरात्रपर्वणि पाठपूजनं तथा महर्षि-प्रदत्त-भावातीत-ध्यानस्य अनुष्ठानं हर्षोल्लासेन क्रियते।
"नवसंवत्सरः मङ्गलमयः भवतु।"
अतः सर्वे भारतीयाः एतां परम्परां सम्यग् अवगत्य आचरन्तु, भारतीय-ज्ञान-परम्परायाः वैज्ञानिकतां च संवर्धयन्तु—एवमेव अस्माकं संस्कृतेः यथार्था पहचान अस्ति।
जय गुरुदेवः। जय महर्षिः।

**डॉ. खुशेन्द्रदेव चतुर्वेदी**
सहायक-प्राध्यापकः, ज्योतिष-विभागः
महर्षि महेशयोगी वैदिक विश्वविद्यालयः
करौंदी, कटनी (म.प्र.)
दूरभाष: (9785782018)



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा -१२

येन कर्मणा मनुष्यस्य हितं, सुखञ्च सम्भवेत्, तदेव कर्म कर्तव्यं मनुष्येण। यद् अकर्तव्यं, यच्च परिणामे दुःखदायकं भवति, तादृशं कर्म तु अवश्यं ताज्यमेव।
शरीरचिन्तां परित्यज्य मनुष्यैः मनसा भगवद्भजनं कर्तव्यम्, तथा च शरीरेण जगत्सेवा विधेया। तर्ह्येव जगति मनुष्यशरीरस्य सार्थकता। अन्यथा इदं शरीरं नरकतुल्यं हि स्यात्। एतादृशस्य शरीरस्य धारणं नाम जीवता शरीरेणात्र नरकवत् वासः। श्रीशङ्कराचार्यगुरुणा उक्तं यत्- "को वास्ति घोरो नरकः स्वदेहः।" इति।
एवं गोस्वामितुलसीदासस्य कथनं यत्- "ते नर नरकरूप जीवत जग भव-भंजन-पद-बिमुख अभागी।" इति।
यावत् शरीरं भीषणरोगेण आक्रान्तं न स्यात् तावत् अनेन शरीरेण भजनसेवादिकं कार्यं सम्यक्तया विधातव्यम्। अहर्निशं शरीरस्य प्रक्षालन-सज्जीकरणादिकार्येषु हि या संलग्नता, एवं तद्विषयिणी या रमणता एव, इत्यत्र नैव किञ्चिदपि मनुष्यस्य बुद्धिमता विद्यते। क्वचित् कथितमस्ति यत्- "अमेध्यपूर्णे कृमिजालसङ्कुले स्वभावदुर्गन्धिविनिन्दितान्तरे। कलेवरे मुत्रपुरिषभाविते रमन्ति मूढा विरमन्ति पण्डिताः।।"
एवं रक्त-मांस-मज्जा-कीटाण्वादिभिः परिव्याप्तं, दुर्गन्धपूर्णं, मलमूत्रादिभिः युक्तम् अत्यन्तं निकृष्टं वर्तते इदं मनुष्यशरीरम्। एतस्य हि भोगविलासार्थं यत् भगवद्विस्मरणं भवेत्, ततु मनुष्यस्य महती मूर्खता हि। शरीरसुखं कतीनां दिनानां कृते हि स्याद्वा? अतो यावत् एतस्य शरीरस्य लोके अस्तित्वं विद्यते तावत् अन्यां सर्वां चिन्तां विहाय भगवद्भजन- लोकसेवादिकार्यम् अवश्यं कर्तव्यं मनुष्यैः। मनुष्यशरीरस्य जगति इयमेव महती सार्थकता, अथवा तस्य मनुष्यस्य महती बुद्धिमत्ता वर्तते इति। शुभम्।

# HP Vidhansabha Budget Session - उद्योगपतीनां उत्पीडनं न सहिष्यामहे - मुख्यमंत्री सुक्खुः

**हिमसंस्कृतवार्ताः शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः 'सीआईआई' (CII) हिमाचलप्रदेशेन् गुरुवासरे सायङ्काले आयोजितस्य 'उत्तम-श्वस्तन-दिनाय भविष्योन्मुख-हिमाचलस्य निर्माणम्-वैश्विक-प्रतिस्पर्धायै स्थानीय-सामर्थ्यस्य उपयोगः' इति विषयकस्य वार्षिकसम्मेलनस्य अध्यक्षतां कृतवान्। अस्मिन् अवसरे सः उद्योगपतीन् पर्यटन-खाद्यप्रसंस्करण-सूचनाप्रौद्योगिकी-क्षेत्रेषु निवेशार्थं निमन्त्रितवान्। सः अवदत् यत् वर्तमान-सर्वकारः प्रदेशस्य भौगोलिक-पर्यावरणीय-विशेषतां ध्यानं निधाय 'हरित-उद्योगानां' प्रोत्साहनं ददाति। सर्वकारः उद्योगेभ्यः सर्वविधं सहयोगं सुविधाम् च दास्यति। पर्यटनक्षेत्रे सर्वकारः ३,००० कोटि-रूप्यकाणां निवेशस्य योजनां रचयति। राज्यस्य मण्डलीयावास-प्रमुखपर्यटनस्थलेषु 'हेलीपोर्ट' निर्मीयन्ते, 'हेली-टैक्सी' सेवा च आरब्धा अस्ति। काङ्गडा-विमानस्थानकस्य विस्तारकार्यमपि प्रगतिपथे अस्ति।

**उद्योगपतिभ्यः आश्वासनम्**

मुख्यमन्त्रिणा आश्वासितं यत् "उद्योगपतीनां उत्पीडनम् केनापि मूल्येन न सहिष्यामहे", ते च स्वपीडाः साक्षात् मम संज्ञानं प्रति आनेतुं शक्नुवन्ति। सः 'सिङ्गल-विण्डो' इति प्रणाल्यां परिष्कारस्य बलं दत्तवान् यत् सर्वेषां स्वीकृतीनां कृते एकमेव स्थानं भवेत्। सः अवदत् यत् उद्योगक्षेत्रेषु विद्युत्-समस्यानां निवारणाय प्रयासाः क्रियन्ते। बद्दी-क्षेत्रे शिमला-वत् अधोभूमि-उपयोग-नलीनां (Underground Utility Ducts) निर्माणं भविष्यति। ऊना-जनपदस्य हरोली स्थाने 'बल्क-ड्रग-पार्क' इति विकसितं क्रियते। बद्दी-नगरपर्यन्तं रेल-सम्पर्कं वर्धयितुं राज्यसर्वकारः ५० प्रतिशतं व्ययं वहति, येन 'बीबीएमबी' (BBMB) सम्बद्ध-उद्योगेभ्यः लाभः भविष्यति। मुख्यमन्त्रिणा उक्तं यत् हिमाचलः 'लंग्स ऑफ नॉर्थ इण्डिया' (उत्तरभारतस्य फुफ्फुसः) तथा 'वॉटर बाउल' (जलपात्रम्) इति रूपेण ज्ञायते, किन्तु हिमाचलाय अस्य उचितः भागः न प्राप्तः। अनुच्छेद २७५(१) अन्तर्गतं लभ्यमानं 'राजस्व-हाना-अनुदानं' (RDG) स्थगितम् अस्ति, सर्वकारः च अस्य पुनः प्राप्तये प्रयत्नशीलः अस्ति।

**आत्मनिर्भरतायाः दिशि वर्धमानम् हिमाचलम् : हर्षवर्धनः**

उद्योगमन्त्री हर्षवर्धनचौहानः अवदत् यत् सुखविन्दरसिंहसुक्खुः राज्यस्य प्रथमः मुख्यमन्त्री अस्ति यः संसाधन-सङ्ग्रहणे विशेषं ध्यानं दत्तवान्। हिमाचले विद्युत्-न्यूनता नास्ति, विधि-व्यवस्था च उत्तमा अस्ति। हिमाचलप्रदेशः आत्मनिर्भरतायाः दिशि कार्यं करोति तथा स्थानीय-उत्पादानां क्रयणाय प्रोत्साहनं दीयते। यदा वयं स्थानीय-वस्तूनि चिनुमः, तदा वयं न केवलं स्व-उद्यमानां समर्थनं कुर्मः, अपितु स्व-अर्थव्यवस्थां सुदृढां कुर्मः, आत्मनिर्भर-हिमाचलस्य आधारशिलां च स्थापयामः।